तद् *av.* तब; then तद् इन्द्रः शिरश्चिच्छेद (ŚBr.) then Indra cut his head off. तत एवास्य भयं वीयाय (ŚBr.) thereupon his fear departed; thence, ततो विषं प्र वावृते (ŚBr.) thence the poison has turned away; so तत् तद् अवक्लृप्तम् (ŚBr.) so it is quite suitable; therefore i.154.2 प्र तद् विष्णुः स्तवते वीर्येण therefore Viṣṇu is praised for his heroism; for this i.24.11 तत् त्वा यामि I approach thee for this; as to that तद् आहुः as to that they say; thither iii.58.4 तद् इत् त्वा युक्ता हरयो वहन्तु thither let the yoked bays waft thee; thereby तद् उ देवेभ्यो नि हुते (ŚBr.) thereby he craves pardon of the gods; even तद्धैतदप्यविद्वांस आहुः (ŚBr.) even those who do not know say this; the reason for this तद् यत् तथा (ŚBr.) the reason for this is as follows; there तद् वै यदिदमाहुः 'तत्रैव राज्ञः सभायाम्' ŚBr.

तद्-अन्न *a.* जिसका खाद्य वही है; accustomed to that food viii.47.16.

तद्-अपस् *a.* जिसका काम ही वह है; having that as his work or duty viii.47.16.

त-र्दा *av.* तब; then, at that time = **त-र्दानीम्. तदानीं-दुग्धा** *a.* just milked ŚBr.

तद्-ईद्-अर्थ *a.* जिसका लक्ष्य वही है; directed to that particular object viii.2.16 वयमु त्वा तदिदर्थाः. **तद्-इष्टि** *a.* वह जिसकी इष्टि है; accompanied by such offerings AV. xi.7.19 पशुबन्धास्तदिष्टयः.

तदु खलु महायज्ञो भवति (ŚBr.); thus indeed the great sacrifice arises. **तदु ह स्माह** with reference to that he used to say.

तदु तत् now as to this (ŚBr.). **तदु वै** तत्रैव; on that very subject.

तद्-ओकस् [√उच्] *a.* उसमें रमा; rejoicing in that i.15.1 मत्सरासस्तदोकसः 'तन्निवासाः'.

तद्-ओजस् *a.* तद्बल; endowed with such strength v.1.8 सहस्रशृङ्गो वृषभस्तदोजाः.

तद्-ग्रह्-अ *a.* तदभिनिवेशवान्; accustomed or given to that.

तद्-बन्धु *a.* उस परिवार का; belonging to that family or race x.61.18 तद्बन्धुः सूरिः 'तन्मातृकः'.

तद्रि-यञ्च् *a.* तद्दिगभिमुख; extending thither, going thither TS. v.5.1.2 तद्रियङ्भिर्निर्दहति.

तद्-वश *a.* तदुत्क, उसके लिये लालायित; having a desire for that ii 14.2 तस्मा एतं भरत तद्वशाय. **तद्-विद्** *a.* तज्ज्ञ; knowing that.

तद् धापि [तत्र एतस्मिन्नुक्तेऽर्थे आख्यायिकापि श्रूयते ह स्म] उसके विषय में कहा भी जाता है; regarding that there is a legend BṛUp.

√तन् फैलाना; to stretch, extend, spread TS. iv.7.13.5 अन्वातांसीत् तन्तुम्; प्रारम्भ करना; to commence Sat. ix.1 सवनं तायते 'प्रारभ्यते'; करना; to do or observe i.110.1 तत् मे अपस्तदु तायते पुनः my work is done and it is being done again; देर करना; to delay v.79.9 मा चिरं तनुथा अपः delay not long thy work. Forms. VIII. : *Pr.* तनोति; तन्मसि, तन्वन्ति; तनुते; *Sb.* तनवावहै; *Inj.* तनुथास्; *Ipv.* तनु, तनुहि, तनोतु; Ā. तनुष्व; तनुध्वम्; *Pt.* तन्वन्त्; तन्वान. *Ipf.* अतनुत; अतन्वत. *Pf.* ततन्थ, ततान and तातान; Ā. *1.* ततने, *3.* तत्ने and तते i.83.5 यज्ञैरथर्वा प्रथमः पथस् तते with sacrifices Atharvan first extended the paths; तत्निरे and तनिरे; *Sb.* ततनत्; ततनाम; ततनन्; *Inj.* ततनन्त; *Op.* ततन्युर्; *Pt.* ततन्वांस्. *Ao. root* : अतन्; Ā. *2* अतथास्; *3.* अतत; अत्नत *(3.pl.)*; *a* : अतनत्; *Inj.* तनत्; *s* : अतान् and अतांसीत्; अतंसि; अतंस्महि; *iṣ.* : अतानीत्. *Ft.* तंस्यते. *Ps.* तायते; *Ao.* अतायि. *Pp.* तत. *Gd.* तत्वा, तत्वाय, –तत्य. *Inf.* तन्तुम्.

√तन् [= √स्तन्] घोरना, गरजना; to thunder vi.38.2 तन्यति ब्रुवाणः 'शब्दं करोति यद्वा विस्तारयति'.

तंन् (1) *f.* क्रम, सातत्य; succession, continuation i.26.6 यच्चिद्धि शश्वता तंना 'विस्तृतेन हविषा'. (2) *a.* सतत; continuous, extensive TS. i.8.21.1 वारेण शश्वता तंना 'विस्तीर्णेन', i.38.13 अच्छा वदा तंना गिरा 'तनया देवतास्वरूपं प्रकाशयन्त्या'. (3) *f.* संतति; offspring (तंना *Instr.*) vi.49.13 तन्वा तंना च 'तनयेन', x.148.1 त्मना तंना 'धननामैतत्'; iii.25.1 तंना पृथिव्याः 'तनयः'. **तंना** *av.* सातत्येन; in unbroken duration i.3.4 तंना पूर्तासः 'नित्यम्'.

तंन्-अ (1) *n.* विस्तार, संतति; continuation, offspring

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TS. iii.5.11.3 तोकस्य नस्तने तनूनाम् 'विस्ताराय', i.39.7 तनाय ··· अवो वृणीमहे 'पुत्रार्थम्'. (2) *a.* सतत, अविच्छिन्न; continuous, unceasing viii.25.2 मित्रा तना न रथ्या Mitrá and Váruṇa like two constant charioteers.

तन्-अय [Formation like धारय] (1) *m.* संतान; line of descendants ii.23.19. तनयं च जिन्व 'संतानम्'. (2) *a.* सतत, वंशचालक; continuous, propagating family iii.1.23 स्यान्नः सूनुस्तनयो विजावा 'संतानस्य विस्तारयिता'.

तना = तना AV. vii.73.5 मधोर्दुग्धस्याश्विना तनायाः.

तन्-इमन् *m.* तनुता; thinness. **तन्-इष्ठ** *a.* अति तनु, अति दुर्बल; very thin, smallest. **तन्-ईयांस्** *a.* बहुत सूक्ष्म; very thin; बहुत कम; very few in number ŚBr. ii.1.69 ततो देवास्तनीयांस इव परिशिशिरे 'अल्पीयांसः'.

तन्-उ [*f.* तनू, तन्वी] *a.* सूक्ष्म; thin; लम्बा, फैला; long, extensive viii.76.12 वाचमष्टापदीं ··· तन्वं ममे 'न्यूनाम्', viii.1.18 अर्या वर्धस्व तन्वा गिरा मम 'ततया विस्तृतया' ('श्लक्ष्णया').

तन्-ऊ *f.* देह; body (long and slender) vi.75.12 अश्मा भवतु नस्तनूः; आत्मा; स्वयम्; soul, self vi.46.12 यत्र शूरासस्तन्वो वितन्वते ··· अध स्मा यच्छ तन्वे तने च छर्दिः when heroes strain themselves (in battles), then especially bestow protection on us and our sons, iii.1.1 तन्वं जुषस्व find pleasure in your own self, AV. vii.3.1 स्वया तन्वा तन्वमैरत् with his own self he sent forth a self.

तनू-कृ-त् *a.* जीवनदाता; promoting life i.31.9 तनूकृद् बोधि 'पुत्ररूपशरीरकारी'.

तनू-कृत् *a.* शरीरनाशक; destroying life, a demon TS. i.3.4.1, vi.3.2 तनूकृद् ध्येषः.

तनू-कृ-र्थ *a.* जीवननिर्माण; fashioning or preserving life viii.86.1 ता वां विश्वको हवते तनूकृथे 'तनोति कुलमिति तनूः पुत्रः तस्य निमित्तम्'.

तनू-ज *m.* शरीरजात; produced from the body AV. i.23.4 किलासस्य तनूजस्य.

तनू-त्यज् *a.* देह वार देने वाला; risking one's life AV. xviii.2.17 शूरासो ये तनूत्यजः. **तनू-दूष्-इ** *a.* तनूनाशी; destroying the person AV. xiv.1.38 तनूदूषिमपोहामि. **तनू-धा** *a.* शरीररक्षक; preserving body TS. iv.4.8.1.

तनू-नपात् *m.* अपने आप का पुत्र; son of himself, self-generated i.13.2 तनूनपात ··· कवे (*Voc.*), TS. ii.6.1.1 तनूनपातं यजाते. **तनू-नप्-तृ** = तनूनपात् TS. iii.2.7.1.

तनू-प्-अ [also —पाः] *a.* शरीररक्षक; protecting the person iv.16.20 उग्रोऽविता तनूपाः; cp. TS. iv.4.8.1. **तनू-पान** *a.* शरीररक्षक; body-protecting AV. iii.5.8 पर्णोऽसि तनूपानः, TS. iii.7.3.2 देवपुरा एवैतास्तनूपानीः 'शरीरस्य पालयित्रीः'. **तनू-पा-वन्** = तनूप ABr. ii.27 तनूपावानः for तनूपाः AV. vi.41.3.

तनू-बल *n.* शरीरबल; bodily strength AV. ix.4.20 अथो अस्तु तनूबलम्.

तनू-रुच् *a.* शरीरेण दीप्यमान; brilliant in person ii.1.9 त्वाम् ··· तनूरुचम् 'शरीराणां दीपकं शरीरेषु दीप्यमानं वा'.

तनू-शुभ्-र = तनूरुच् v.34.3 ततर्नुष्टिं ··· तनूशुभ्रम् 'तनूः शुभ्रा शोभनीया अलंकारादिभिर्यस्य'.

तन्-ति [also —तन्ती] *f.* रस्सी; cord vi.24.4 वत्सानां न तन्तयः 'दीर्घप्रसारिता रज्जुः यत्र नियतैर्दामभिः बहवो वत्सा बध्यन्ते'. **तन्ति-चर्-अ** *a.* रस्सी के साथ फिरने वाला; roaming near the cord of cattle TBr. iii.3.2.5 रुद्रस्तन्तिचरो वृषा 'तन्तिः कर्मसंतानस्तत्र चरतीति'.

तन्-तु *m.* तागा; thread ii.28.5 मा तन्तुश्छेदि वयतः 'कर्मसंततिः', cp. TS. iv.41.2.

तन्तु-मन्त् *a.* प्रजारूप तन्तु का भर्ता; one who supports the generations : Agni, ĀpŚS. 2329.

तन्-त्र *n.* खट्टी, वस्त्र; loom, cloth x.71.9 सिरीस्तन्त्रं तन्वते 'कृषिलक्षणम्'; पट, अङ्गद; cloth, ornament for the arms VS. xix.80 सीसेन तन्त्रम् 'अङ्गदविशेषम्' Mah.; प्रयोग; application प्रतितन्त्रम् 'प्रतिप्रयोगम्' Sat i.1; कर्मकलाप; rites Sat. vii.2.

तन्त्राय्-ईन् *a.* बुनने वाला, तुरी वाला; weaving (day and night, Sun) VS. xxxviii.12 तन्त्रायिणे नमः 'सूर्याय'.

तन्त्री *f.* तांत; string of a lute पञ्चतन्त्रीरुदूहति 'पञ्चतन्त्रीर्वादयति', Paryadhyāya 41.

√**तन्द्** थक जाना, ढीला पड़ जाना; to get tired, slacken i.138.1 महित्वमस्य तर्वसो न तन्दते 'विरमति'. **तन्द्-र** *a.* थका, मांदा; tired. See अ-तन्द्र; पंक्ति; row VS. xv.5 तन्द्रं छन्दः. **तन्द्र-यु** *a.* थका; wearied viii.92.30. मो षु ब्रह्मेव तन्द्रयुः 'आलस्ययुक्तः'. **तन्द्राविन्** *a.* तन्द्रायुक्त; sleepy, slothful : TAr. iv.7.18. **तन्द्-री** *f.* तन्द्रा; weariness AV. viii.8.9 श्रमस्तन्द्रीश्च मोहश्च.

तन्यतु *f.* बिजली; thunder i.80.12 न वेपसा तन्यतु 'घोरेण गर्जनशब्देन'. **तन्यतु** (1) *m.* कड़क, बिजली; thunder i.116.12 तन्यतुर्न वृष्टिम् 'मेघस्यः शब्दः', x.66.10 महिषस्य तन्यतोः 'महतः शब्दस्य'. (2) *a.* विस्तारयिता; one who extends TS. i.3.14 स शिवतानस्तन्यतुः.

√**तप्** जलाना; to burn iii.18.2 तप उ ष्वग्ने अन्तराँ अमित्रान् burn instantly, O Agni, our neighbouring foes, viii.102.16 तेपानो देव शोचिषा 'तपन्'; प्रदीप्त होना; to shine

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

hot (Sun) ii.24.9 आर्दित सूर्यस्तपति 'दीप्यते'; गरम करना, तपाना; to warm up iii.53.14 न तपन्ति घर्मम् 'दीपयन्ति'; जलाना, सताना; to burn, torture vii.34.19 तपन्ति शत्रुम् 'बाधन्ते; संतप्त होना; to feel grief or sorrow x.34.10 जायां तप्यते कितवस्य हीना 'संतप्ता भवति'; यं कुतश्चनातपेत 'यः कुतोऽपि संतप्तो न भवेत्' ĀpŚS. 620. Forms. I. : *Pr.* तपति, –ते; *Sb.* तपाति; *Inj.* तपत्; *IPv.* तपतु; *Pt.* तपन्त्. *IPf.* अतपत्. IV. P. : *Pr.* तप्यति. *Pf. 1.* ततप. *3.* ततापि; तेपे; *Sb.* ततपते; *Pt.* तेपान. *Ao. root* : *Pt.* तपान; *red.* : अतीतिपे *(3. s.)*; *s.* : अताप्सीत्; अतप्थास्; *Inj.* ताप्सीत्; ताप्तम्. *Ft.* तप्स्यति. *Ps.* तप्यते; *Ao.* अतापि; *Pp.* तप्त. *Gd.* तप्त्वा, –तप्य. *Inf.* तप्तोस्. *Cs.* तापयति, –ते; *Ps.* ताप्यते.

तप् *a.* तापक; burning in आतप्, तपिष्ठ. **तप्-अ** *m.* माघ; the month Māgha TS. iv.4.11.1. **तप्-अन** *a.* संतापक; tormenting, painful ii.2.3.4 ब्रह्मद्विषस्तपनः 'तापकः', AV. iv.18.6 आत्मने तपनम् painful to himself. **तप्-अनी** *f.* तपिश; heat, glow ii.23.14 तेजिष्ठया तपनी.

तपश्चिताम्-अयन *n.* name of a Sattra TMB. xxv.5.

तप्-अस् *n.* कृच्छ्रादि तपस्या; asceticism x.167.1 तपः परितप्य 'शतसंख्याश्वमेधलक्षणं परितप्य'; तपिश, तेजस्; heat vi.5.4 तपसा तपस्वान् 'तेजसा'; क्लेश; torture, distress TS. iv.3.13.4 तपिष्ठेन तपसा 'संतापेन', vii.8.2.7 न तपः कुतश्चन 'संतापः'. Cp. TS. iv.3.11.8 एकाष्टका तपसा तप्यमाना 'पुत्रार्थं तपश्चरन्ती'.

तपस्-पति *m.* तपस्या का स्वामी; lord of penance VS. v.5.

तपस्-य (1) *a.* तपिश से उत्पन्न; produced by heat KŚS. xxv. (2) *m.* फाल्गुन; the month of Phālguna TS. iv.4.11.1.

तपस्-वन्त् *a.* गरम; hot vi.5.4 तपा तपिष्ठ तपसा तपस्वान् 'तेजस्वी'.

तपस्-विन् *a.* गरम, तपस्वी; hot, heated, practising austerities AV. xiii.2.25 रोहितो दिवमारुहत् तपसा तपस्वी; दुर्बल; weak TS. v.3.3.4 तस्मात् सर्व्यः हस्तयोस्तपस्वितरः.

तप्-इष्ठ *a.* अत्युष्ण; extremely hot vi.5.4 तपा तपिष्ठ 'तप्ततम'; अतिसंतापकारी; inflicting extreme pain TS. i.2.14.1 तपिष्ठैः 'बाणैः'.

तप्-उ *a.* तापक; hot, glowing ii.4.6 तपू रण्वश्चिकेत 'तापकः'.

तपुर्-अग्र [cp. ज्योतिरग्र] *a.* प्रदीप्ताग्र; equipped with glowing tip or point x.87.23 तपुरग्राभिर्ऋष्टिभिः 'तपनशीलाग्रभिः'.

तपुर्-जम्भ्-अ *a.* दाहक दाढ़ वाला; burning-jawed (Agni) i.36.16 तपुर्जम्भ 'तप्यमानरश्मियुक्त'.

तपुर्-मूर्धन् *m.* प्रदीप्त-शिरस्क; burning-headed vii.3.1 तपुर्मूर्धा पावकः; 'तापकतेजाः'.

तपुर्-वध्-अ *a.* दारुणास्त्र; having burning weapons vii.104.5 तपुर्वधेभिरर्जरेभिः 'तापकप्रहारैः'.

तपुष्-इ *a.* तापक (अस्त्र); burning (weapon) iii.30.17 ब्रह्मद्विषे तपुषिं हेतिमस्य 'तापकम्'. **तपुष्-ई** *f.* क्रोधाग्नि; heat of anger Naigh. ii.13.

तपुष्-पा *m.* तपते को पीने वाला; drinking warm beverage iii.35.3 उपो नयस्व वृषणा तपुष्पा 'तापकेभ्यः शत्रुभ्यो रक्षक'.

तप्-उस् (1) *a.* तापक; hot ii.30.4 तपुषारिनेव विध्य 'तापकेन दीप्तेन'. (2) *n.* गरमी; heat, glow vi.62.8 रक्षोर्युजे तपुरघं दधात 'तापकम्', iii.39.3 तपुषो बुध्ने 'तपुर्दिवसः'.

तपो-जा *a.* तपोजन्य; born of asceticism x.154.5 तपोजान् ··· ऋषीन्. **तपो-नित्य** *a.* तपसि नियत, तपःपरायण; steadfast in penance TUp.

तप्-र्त *a.* गरम; hot, heated, inflamed. **तप्त-व्रत** *a.* उष्णक्षीरी; using hot milk for the initiatory rite TS. vi.2.2.7. **तप्तायनी** *f.* मुसीबत का घर; dwelling place of distress (epithet of earth).

तप्-नु *a.* तापक; burning MS.

तप्-यती *f.* गरमी; heat TS. i.4.35.1.

तप्-य-तु *a.* तापक; hot, glowing ii.24.9 तप्यतुर्वृथा 'तापकः'.

√**तम्** सांस टूटना; होश खो बैठना; to faint, gasp for breath, get bewildered ii.30.7 न मा तमत् 'न तमयतु न ग्लपयतु'; cp. पशुं तमयन्ति 'श्वासरोधं कृत्वा मारयन्ति'. Forms. IV. P. : *Pr.* तम्यति. *Pf.* ततम. *Ao. a* : *Inj.* तमत्. *Pp.* तान्त. *Inf.* तमितोस्. *Caus.* तमयति.

तम्-अन *n.* श्रान्ति; exhaustion.

तम्-अस् *n.* अन्धकार, पाप; darkness, sin i.46.6 ज्योतिष्मती तमस् तिरः 'अन्धकारम्'. **तमस्-अ** *a.* कृष्णवर्ण; dark-coloured AV. xi.9.22 तमसा ये च तूपराः. **तमस्-वन्त्** *a.* अन्धकारमय; dark, gloomy AV. xix.47.2 उर्वि तमस्वति रात्रि.

तमिष्-ईची [तमिस्, √अञ्च् 'directed to darkness'] *f.* अन्धकार में डाल देने वाली, अन्धकारमय; oppressing, confusing viii.48.11 निरत्रसन् तमिषीचीरभैषुः 'बलवत्यः'. तमिस् = तमस् like महिस् for महस् 'greatness'. **तमिस्-रा** *f.* अंधेरी रात, dark night ii.27.14 मा नो दीर्घा अभि नशन् तमिस्राः 'तमसा युक्ताः'.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमो-र्गा *a.* रात्रिंचर; roaming in darkness v.32.4 मिहो नपातं सुवृधं तमोर्गाम् 'अन्धकारं गच्छन्तम्'. **तमो-घ्-अ** *a.* तमोहन्ता; dispelling darkness TAr. i.10.4.

तमोऽभ्य्-अय [√इ] *m.* अन्धकार का आगमन; approach of darkness KŚS. iv.15.13.

तमो-र्हन् = तमोघ i.140.1 शुक्रवर्णं तमोर्हनम्.

तम्-र्र *a.* अन्धकार करने वाली, संतापक; darkening, oppressing x.73.5 मिहः प्र तम्रा अवपर्त्तमांसि 'अवर्षणेन ग्लापयित्रीः'; cp. ताम्र 'dark'.

तया-देवतम् 'तया देवतया' by that deity, naming that deity Sat xi.6.

√तर् [√तॄ] आगे बढ़ना, पार जाना; to press through, cross water, cross over difficulties vi.68.8 अपो न नावा दुरितां तरेम = vii.65.3; किसी पर हावी हो जाना; to prevail upon some one vii.32.13 पूर्वीश्चर्न प्रसितयस्तरन्ति तम् 'न व्याप्नुवन्ति'; – को लांघ जाना; to surpass, excel vi.47.17 विर्तुराणो अपरेभिरेति 'हिंसन्'; to cross through, withstand i.32.6 नातारीदस्य समृतिं वधानाम् 'तरीतुं नाशक्नोत्'; to go through a way ix.73.6 ऋतस्य पन्थां न तरन्ति दुष्कृतः 'नोत्तारयन्ति'; to live through a period of time v.54.15 तरेम तरसा शर्त हिमाः 'शतसंवत्सरं जीवेम'; to attain x.27.2 तदव्यथी जरिमाणस्तरन्ति 'अवतारयन्ति'. Forms. I. : *Pr.* तरति, –ते; *Sb.* तराथस्; *Inj.* तरत्; *Op.* तरेत्; *Ipv.* तर; *Pt.* तरन्त्. *Ipf.* अतरत्. VI. : *Pr.* तिरति, –ते; *Sb.* तिराति; *Inj.* तिरन्त; *Op.* तिरेत, –तन *(2. pl.)*; *Ipv.* तिर; तिरत, तिरन्तु; तिरध्वम्; *Pt.* तिरन्त्. *Ipf.* अतिरत. III. : *Pt.* तितरत्. VIII. : Ā. : तरते. *Pf.* ततार; तितिरुर्; *Pt.* ततरुस्– (weak stem) and तितिर्वांस्. *Ao. red.* : अतीतरस्; *is.* : अतारीत्; अतारिष्म and अतारिम, अतारिषुर्; *Sb.* तारिषस्, तारिषत्; *Inj.* तारीस्, तारीत्; *Op.* तारिषीमहि. *Ps. Ao.* अतारि; *Pp.* तीर्णं. *Gd.* तीर्त्वा. *Inf.* –तिरम्, –तिरे; तरध्यै; तरीषणि. *Cs.* तारयति; *Ds.* तितीर्षति. *Int.* तर्तरीति; तर्तूर्यन्ते; *Pt.* तरित्रत्.

तर् [√स्तृ] *f.* तारा; star.

तर्-अ [अतिक्रम्य पुरोगमनम्] *m.* तरण; the act of going across ii.13.12 तराय 'तरणाय'.

तर्-क्षु [त्वरितं खादतीति] *m.* चित्रव्याघ्र; hyena VS. xxiv.40, TS. v.5.19.

तर्-अणि *a.* तारयिता, तेज, शक्तिशाली; taking across, swift, energetic vi.1.5 त्वं त्रातार तरणे 'तारक', vii.32.9 तरणिरिज् जयति क्षेति पुष्यति the energetic alone conquers, rules and thrives. **तरणि-त्व** *n.* सामर्थ्य; energy, zeal i.110.4 तरणित्वेन 'तरणिरिति क्षिप्रनाम । शैद्रयेण', i.110.6 तरणित्वा यं पितुरस्य सश्चिरे 'तरणकौशलानि'.

तरत्-सम *m.* बुसाग्नि; conflagration of chaff. **तरद्-द्वेषस्** *a.* शत्रुजेता; overcoming foes i.100.3 तरद्द्वेषाः सासहिः 'जितशत्रुः'.

तर्-अन्त *m.* एक नाम; name of a person v.61.10 तरन्त इव मंहना.

तर्-अस् (1) *n.* बल, जोश, उल्वणता, त्वरा, वेग; strength, zeal, velocity, quickness, speed i.33.12 यावत् तरो मघवन् 'वेगः', iii.18.3 जुहोमि हव्यं तरसे बलाय 'वेगाय', viii.67.19 नस्माकमस्ति तत तर आदित्यासो अतिष्कदे this our zeal is not to be overlooked, O Ādityas; नौका; ferry i.190.7 उभयं चष्टे तर आपश्च गृध्रः 'तरणं जलादिवृद्धिम्'. (2) *a.* बलवान्, वेगवान्; strong, quick.

तरस-पुरो-डाश्-अ *a.* मांसरूप पुरोडाश वाला; having meat as Puroḍāśa.

तरस-मय *a.* मांसमय; made of flesh तरसमयाः पुरोडाशाः KŚS. xxiv.5.20.

तरस्-वन्त् *a.* बली, धृष्णु; bold TBr. ii.8.4.1. **तरस्-विन्** *a.* प्रगल्भ, वेगवान्; bold, energetic, quick viii.97.10 तवसं तरस्विनम् 'वेगवन्तम्'.

तर्-ईयांस् *a.* आसानी से पार करने वाला; easily passing through v.41.12 नभस्तरीयाँ इषिरः 'तरितव्यः'.

तरीषणि [*Loc. Inf.*] पार करने या जीतने को; to cross or conquer iv.37.7 विश्वा आशास्तरीषणि that we may conquer all regions.

तर्-उ *a.* वेगवान्; quick v.44.5 तरुभिः सुतेगृभम् 'तरुविकारैर्ग्रहैः'.

तर्-उ *m.* वृक्ष; tree.

तरु-क्ष्-अ *m.* एक नाम; name of a person viii.46.32 विप्रस्तरुक्ष आ ददे. **तर्-उण** *a.* नवोदित, नवजात, किशोर; freshly arisen, newly born, young viii.43.7 पुनर्यन्तरुणीरपि (ओषधीः), iii.55.5 सद्यो जातासु तरुणीष्वन्तः 'पल्लवितासु'. **तरुण्-इर्मन्** *m.* तारुण्य; youth.

तर्-उ-तृ *a.* जेता; conqueror i.119.10 स्पृधां ··· : तरुतारम् 'तारकम्', vi.66.8 नास्य वर्ता न तरुता न्वस्ति there is none at all to obstruct, none to overcome him; वर्धक, चालक; promoter, driver x.178.1 तरुतारं रथानाम् 'अन्यदीयानां रथानां संग्रामे जेतारम्'. **तर्-उ-त्र** *a.* पारयिता; carrying across i.117.9 वाजिनं ··· तरुत्रम् 'तरितारम्'; जेता; victorious iii.30.3 मघवा तरुत्रः 'तरन्त्यनेन शत्रून् देवाः'; जयप्रद; granting or leading to victory vi.72.5 तरुत्रम् ··· शुष्मम् 'तारकम्'.

तर्-उ-ष *a.* अभिभविता; overcoming vi.15.3 अर्यः परस्यान्तरस्य तरुषः 'शत्रोः तरिता'. **तरुष्-र्यन्त** *a.* आक्रान्ता,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योद्धा; attacking, fighting viii.99.5 असि त्वं तूर्य तरुष्यतः 'बाधकान् बाधमानः'.

तर्-उस् *n.* उत्कर्ष, व्यावृत्ति; superiority, ascendancy i.122.13 तरुष ऋञ्जते नॄन् 'शत्रूणां तारकान्'; युद्ध; fight vi.25.4 तनूरुचा तरुषि यत् कृण्वैते 'युद्धे'.

तर्-ऊषस् *a.* तारयिता, जयप्रदाता; taking across, giving victory i.129.10 रार्या तरूषसा 'अस्मानापदभ्य उत्तरीतुं शक्तेन'.

तर्-तुर्-आण [*Pf. Pt.* √तर्, √तॄ] *a.* अभिभविता; oppressing vi.47.17 विर्तुराणो अपरेभिरेति 'हिंसन्'.

तर्द्-अ *m.* पक्षिविशेष, खुटेबढ़ैया; wood-pecker AV. vi.50.1 हतं तर्दम्.

तर्द्-ऊ *f.* लकड़ी की कड़छी; wooden ladle. 'मूषकादि' on Kauś. ii.1.

तर्द्-मन् [तृद्यत इति] *n.* छिद्र; hole, cleft. **तर्द्म-सम्-उर्त** *a.* कीलक-छिद्रों में संस्यूत; fixed in holes.

तर्प्-अण *n.* तृप्ति; satiety, satisfaction.

तर्-मन् *n.* तरण; crossing in सु-तर्मन् etc.; यूपाग्र; the point of post; cp. Gk. terma 'aim'.

तर्-य *m.* एक नाम; name of a person v.44.12 श्रुतर्वितर्यः.

तर्ष्या-वन्त् *a.* तृषित; thirsty x.28.10 महिर्षस्तर्ष्यावान् 'तृषावान्'.

√**तर्ह्** घायल करना; to crush, bruise AV. xi.5.7 असुरांस्ततर्ह. Forms. VII. P. : *Pr.* तृर्णेढि; तृंहन्ति; *Ipv.* तृर्णेढु; *Sb.* तृणहान्; *Pt.* तृंहन्त्. *Pf.* ततर्ह. *Ao. a* : अतृहम्. *Ps.* तृह्यते. *Pp.* तृढ. *Gd.* तृढ्वा.

तर्ह्-अण *a.* हिंसक; crushing vii.104.4 अर्धशंसाय तर्हणम् 'हिंसकम्'.

तर्-हि *av.* तव; at that time, then.

तलव [तालव – ताल] *m.* मुखवाद्यकारी; one who whistles to produce music VS. xxx.20, TBr.iii.4.15.

तलाशा [तल √अश्] *f.* वल्लीविशेष; a kind of creeper, a substitute of Soma AV. vi.15.3 तलाशा वृक्षाणामिव, Kauś. viii.16 'वृक्षविशेषः'.

तलीद्य [or —ड्य] *n.* पैर की तली; sole of the foot AV. vii.76.3 यः · · · तलीद्यमवर्तिष्ठति (तलीडी 'ankle', cp. एडी Hindi).

तल्-प [√स्तृ; cp. स्तूप] *m.* बिस्तर; bed AV. v.17.12 कल्याणीं तल्पमा शये; जाया; wife ChUp. v.9 गुरोस्तल्पमावसन् 'गुरोर्दारानावसन्'. **तल्प-शी-वन्** *m.* चारपाई पर लेटा; lying on a couch viii.55.8 नारीर्यास्तल्पशीवरीः 'तल्पशयाः'. **तल्प-सद्-य** *n.* मञ्च पर बैठना; resting on a couch TBr. i.2.6.5.

तल्पे-जा *a.* तल्प-जा; born in bed (medicine) TAr. v.39.1. **तल्पे-शय्-अ** = तल्पशीवन् AV. iv.5.3.

तल्प्-य *a.* तल्पसंबन्धी, तल्पार्ह तल्प्या राजपुत्राः 'राज्ञा सहैकस्मिन् तल्पे शयनार्हाः' Sat. xiv.1, deserving a noble couch नमस्तल्प्याय VS. xvi.44.

तव्-अस् [√तु] *n.* बल, सामर्थ्य, शक्ति; strength iii.30.8 अपादमिन्द्र तवसा जघन्थ 'बलेन'. **तव्-अस्** *a.* बली; strong iii.1.13 तवसं दुवस्यन् 'वृद्धम्', TS. ii.2.12.5 तं त्वा गृणामि तवसमतवीयान्. **तवस्-तम** *a.* अतिबली; very strong, strongest ii.33.3 तवस्तमस्तवसाम् 'अतिशयेन प्रवृद्धः'. **तवस्-तर** *a.* अधिक बली; stronger.

तवस्-य *n.* शक्ति, बल; strength ii.20.8 तस्मै तवस्यमनु दायि सत्रा 'बलवर्धकं हविः'. **तवस्-वन्त्** *a.* शक्तिशाली; powerful ix.97.46 धीरं उशतें तवस्वान् 'वेगवान्'.

तवा-गा [तवा from √तु] *a.* शक्तिशाली; powerful iv.18.10 गृष्टिः ससूव स्थविरं तवागाम् 'प्रवृद्धबलम्'.

तव्-इ-ष [like महिषः] (1) *a.* शक्तिशाली; strong i.165.6 अहं ह्युग्रस्तविषस्तुविष्मान् 'बलवान्'. (2) *n.* शक्ति; strength, heroic deed viii.57.1 युक्ता रथेन तविषम् 'बलं यथा भवति तथा'. **तव्-इ-षी** *f.* बल; strength i.35.4 तविषीं दधानः 'बलम्'. **तविषी-मन्त्** *a.* बलवान्, उल्बण; strong, violent v.58.1 तमु नूनं तविषीमन्तमेषाम्. = **तविषी-वन्त्** iv.20.7 तविषीव उग्र 'तविषीवः बलवन्'.

√**तविषीय** [*Denom.*] बली बनना; to be strong or violent viii.6.26 यदङ्ग तविषीयसे 'बलमिवाचरसि'. **तविषीयु** *a.* बलवान्; spirited viii.7.2 यदङ्ग तविषीयवः, viii.23.11 अश्वा इव वृषणस्तविषीयवः.

तव्-इ-ष्य-माण *a.* ओजायमान; putting on strength viii.76.3 तविष्यमाणो जठरेष्वा विश 'वर्धयिष्यमाणः'.

तव्-इष्या *f.* उल्बणता; vehemence ix.70.7 रुवति भीमो वृषभस्तविष्यया 'आत्मनो बलेच्छया'.

तव्-ईयांस् *a.* अधिक बलवान्; stronger = तव्यांस् vi.20.3 तवसस्तवीयान्. **तव्-यांस्** अधिक बली; stronger x.117.5 पृणीयादिन्नाधमानाय तव्यान् 'तवीयान्'. **तव्-य** *a.* शक्त; strong i.54.11 महि क्षत्रं जनाषाळिन्द्र तव्यम् 'प्रवृद्धम्'.

तष्-ट *a.* घटित, रचित; pared, hewn. Cp. विश्व-तष्ट.

तष्-टृ [√तक्ष्; = तक्षन्, Aw. tasǎn, Gk. textōn] *m.* वर्धकि, बढ़ई; carpenter, cartwright i.61.4 रथं न तष्टेव.

तस्-अर [√तंस्] *n.* नववस्त्र; new cloth; cp. Hindi टसर TBr. ii.6.4; नाल; shuttle x.130.2 सामानि चकुस्तसराण्योतवे, VS. xix.83 तसरं न वेम.

तस्-कर्-अ [√तंस्; Russ. taska 'drawer' or is it *त्सर्-अक ?] *m.* चोर, डाकू; thief, robber vi.28.3 न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दभाति तस्करः 'चोरः'.

त-स्तभ्-वांस् [*Pf. Pt.* √स्तम्भ्] जो थाम चुका है; having held fast ii.11.5 अपो यां तस्तभ्वांसम्.

त-स्तुव्-अ [थोहर in Hindi ?] *m.* जहर का तोड़; an antidote against poison AV. v.13.11 तस्तुवेनारसं विषम्.

त-स्थानं [*Pf. Pt.* √स्था] *a.* खड़ा; standing ŚBr. iii.9.4.14 संतस्थानं अर्जरं.

त-स्थि-वांस् = तस्थानं v.85.5 मनिनेव तस्थिवाँ अन्तरिक्षे 'तिष्ठन्'.

तस्मात् *av.* इसलिये; on that account, from that.

तार्जक् *av.* तदानीमेव; immediately TS. ii.2.2.3 तार्जगार्तिमर्छति, TS. ii.5.5.6 तार्जक् पुण्यो भवति 'तदानीमेवैतरेभ्यो व्यावृत्तो जायते' = **तार्जत्** in **तार्जद्-भङ्ग** *m.* एरण्ड; the castor plant AV. viii.8.3 तार्जद्भङ्ग इव भज्यताम्.

ताड्-अ (1) *m.* पीटना, छाती पीटना; blow AV. xix.32.3 नोरसि ताडमाघ्नते. (2) *a.* ताड़ने वाला; one who beats.

ताण्डविन्द *m.* एक नाम; name of a teacher ŚA. viii.10. **ताण्ड्-य** *m.* एक आचार्य; name of a teacher = तण्डपुत्रः.

तात् [*old abl.* of तं] *av.* इस प्रकार; in this way, thus vi.21.6 यादेवं विद्म तात् त्वा महान्तम् 'तैः कर्मभिः'.

ता-तृप्-आर्ण [*Pf. Pt.* √तृप्] *a.* संतृप्त; perfectly satisfied x.95.16 तादेवेदं तातृपार्णा चरामि 'तृप्ता'.

तां-तृप्-इ *a.* तर्पयिता; delighting much iii.40.2 पिर्वा वृषस्व तातृपिम् 'आप्यायनकारिणम्'.

ता-तृष्-आर्ण [*Pf. Pt.* √तृष्] *a.* तृषित, पिपासित; thirsty ii.4.6 तातृषार्णो न भाति 'तृषितः'.

तात्-र्य *a.* पिता-सा; fatherly i.161.12 तात्र्या पितरा 'तातौ तायमाने वृष्ट्युदके। यद्वा तात्या तासु वर्षासु। अथवा पितृविशेषणम्, तात्या तत्कालीनौ', vii.37.6 तात्र्या धिया 'संततया'.

तादीत्ना *av.* तदानीम्; then i.32.4 तादीत्ना शत्रुं न किला विवित्से (= तादीक्ना TBr. ii.5.4) then thou didst find no foe at all.

तादुरी [= तातुरी √तॄ ?] *f.* मेंढकी; female frog AV. iv.15.14 वर्षमा वद तादुरि; see तदुरि in AV. iv.15.15.

ता-दृश् *a.* वैसा; such, like, such a one v.44.6 यादृगेव ददृशे तादृगुच्यते.

तान्-अ *m.* एकश्रुति; monotone : उदात्तानुदात्तस्वरितानां परः संनिकर्षः.

तानूनप्त्र [तनूनप्तृसंज्ञकजाठरवह्निविषयस्य शपथकर्मणो हेतुभूतमाज्यं घृतं वा तानूनप्त्रम् 'तनूनप्त्रे त्वा गृह्णामि (TS. i.2.10.2) इत्यादिभिर्मन्त्रैश्चमसे यदाज्यं गृह्यते तत्] *n.* तनूनप्तृविषयक शपथकर्म का हेतुभूत आज्य; oblation related to the śapatha concerning Tánūnáptṛ fire : a ceremony in which Tánūnápāt is invoked and the oblation is touched by the sacrificer and the priests as a form of adjuration TS. iii.1.2.2, ŚBr. iii.3.3.9 न संतानूनप्त्रिणे द्रोग्धव्यम् 'संगूर्य शपथकारिणे न द्रोग्धव्यम्'.

तान्त *m.* त का अन्त; end of **त**, a mythical name of **थ. तान्तं** [√तम्] *a.* जिसके सांस उखड़ गये हैं, बेहोश; breathing with difficulty, fainted away. **तान्त्री दक्षिणा** *f.* यज्ञतन्त्रार्था दक्षिणा; dakṣiṇā meant for the continuation of sacrifice Sat. x.6.

तान्व-अ [तनू 'body'] (1) *a.* अपना आपा, शरीर का अपना; belonging to the body, beloved son. (2) *m.* तन्व का अपत्य; descendant of Tanva x.93.15 सर्वो दिदिष्ट तान्वः 'तान्वो नामर्षिः'.

तापय्-इष्णु *a.* संतापक; tormenting x.34.7 तर्पनास्तापयिष्णवः 'संतापनशीलाः'.

तापश्-चित्-अं [तपश्चितामयनम्] *n.* तपश्चितों का सत्र; the Sattra of the Tapaścits. *m.* **—तः** तपश्चितामयन की अग्नि; the fire of the Tapaścitāmayana TS. v.6.5.

तापस्-अं *a.* तपस्वी, वानप्रस्थ, one who practises austerities, Vānaprastha ŚBr. xiv.

ताप्-इन् *a.* in उपतापिनीः 'रोगगृहीताः' Kauś. xix.1.

तार्बुव *n.* विषहरण (तावीज); an antidote against poison AV. v.13.10 तार्बुवं न तार्बुवम्; cp. तस्तुव.

तामली *f.* तमाल वृक्ष की छाल की बनी; made of the Tamāla bark Sat. xxvi.1.

तामिस्राष्टमी *f.* कृष्णाष्टमी; the eighth day of the black half Khādira. iii.3.27.

तामी *f.* प्राणायाम; deep breathing तिस्रस्तामीस्ताम्यति 'त्रीन् प्राणायामान् करोति' Kauś. lxxxv.20.

ताम्-रं [√तम्] *a.* तांबे के रंग का, तांबे का बना; of a coppery red colour, made of copper VS. xvi.6 ताम्रो अरुणः.

ताय्-उ [= स्तायु] *m.* चोर; thief v.15.5 पदं न तायुर्गुहा दधानः; cp. तस्कर.

तार्-अः [*Npl.* of तार्] तारे; stars. **तार्-अं** *m.* तीर; shore VS. xvi.40, TS. iv.5.8.1. **तार्-अण** *a.* तारक; enabling to cross, helping over a difficulty.

तारुक्ष्य *m.* एक आचार्य; name of teacher AA. iii.1.6.

तार्क्ष्य *m.* श्येन; name of a mythical being (originally mentioned as a horse but later as a bird) i.89.6 तार्क्ष्यो अरिष्टनेमिः 'तृक्षस्य पुत्रो गरुत्मान्'. **तार्छ** [तार्क्ष्य] *m.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तार्क्ष्यास्थिनिर्मित तावीज; an amulet made of the tārkṣya bone Kauś. lviii.24. **तार्ण्-अ** *a.* तृणनिर्मित; made of grass तार्णस्तल्पः.

तार्तीय-सवन्-इक *a.* तृतीयसवन-संबन्धी; related to the third Soma-pressing NS. ii.12.

तार्प्-य [तृपानामौषधिविशेषः । तत्तन्तुनिर्मितं क्षौमम् । वयनकाले उदकेन त्रिस्तर्पयित्वा यद्यते सूत्रं तत्तृप्यम् । तस्य विकारस्तार्प्यम् । त्रिः पायितैस्तन्तुभिर्व्यूतम्] *a.* घृताक्त वस्त्र, तीन बार (घी या पानी) पिलाये तन्तुओं का बना वस्त्र; cloth dipped in ghee, a garment made of the threads thrice treated with water, garment made of the Tṛpā fibres TMB. xxi.10, AV. xviii.4.31. Cp. त्रिपाण.

तार्ष्टार्घी [तृष्टाघ–] *f.* सर्षपनिर्मित; made of the stalks of the sesamum AV. v.29.15 तार्ष्टार्घीः समिधः.

ताल्-अ [= ताडः] *m.* ताल ठोकना, ताल देना; striking hands on thigh, keep time Sat. xxvii.1.

तालु *n.* तालु; palate. **तालु-क** *n.* कागवे के आसपास का स्थान; the two sides of the tonsil.

ताव-र्क *a.* तेरा; thy i.94.11.

तावच्-छस् *av.* उतनी बार, उतना-उतना करके; so many times, in such and such a number or quantity. **तावज्-ज्योक्** *av.* उतनी देर; so long ŚBr. xi.5.1.2.

तावत् *a.* उतना बड़ा, उतना; so great, so large, so much; उतनी दूर; so far x.114.8 यावद् द्यावापृथिवी तावद् इत् तत् so far as heaven and earth, so far it (extends). Cp. AV. xii.2.38 वितावति 'follows' W. **तावत्-कृत्वस्** *av.* उतनी बार; so many times ŚBr. ix.1.1.14. Cp. एतावद् गोरालभम्नस्थानमतिथिः पितरो विवाहश्च (ĀpGS. iii.10) 'एतेषु त्रिषु स्थानेषु'. **तावत्-तात्** *av.* ऐन उतना; just so much. **तावत्-प्रिय** *a.* उतना प्यारा; dear to that extent. **तावद्-वीर्य-वन्त्** *a.* उतना बहादुर; so strong. **तावन्-मात्र** *a.* उतना, उतने; so much, so many.

तिक्तायनी *f.* वह्नितेजःप्रदा; giver of blazing fire TS. i.2.12.1.

तिग्-इ-र्त *a.* निशित; sharp i.143.5 जम्भैस्तिगितैः.

तिग्-र्म [√तिज्] (1) *a.* तेज, नोकदार; sharp, pointed iv.16.17 तिग्मा यदर्शनिः पताति, vii.18.18 तिग्मं · · · वज्रम्; तीव्र; hot viii.43.3 तिग्मा अग्ने तव त्विषः 'तीक्ष्णाः'; रभस्वान्; violently pressing on viii.26.15 तिग्मं न क्षोदः 'जवेन गच्छत'. (2) *f.* तिग्मता, तेजी; sharpness.

तिग्म-जम्भ्-अ *a.* पैने दांतों वाला; having sharp teeth i.79.6 तिग्मजम्भ रक्षसो दह = TS. iv.4.4.5. **तिग्म-तेजस्** *a.* तीखी धार वाला; keen-edged VS. i.24 तिग्मतेजा द्विषतो वधः; तीव्र तेज वाला; having great splendour AV. xix.2.10 शं रुद्रास्तिग्मतेजसः.

तिग्म-भृष्टि *a.* तेज नोक वाला, नुकीला; sharp-pointed iv.5.3 तिग्मभृष्टिः सहस्रेता वृषभः 'तीक्ष्णतेजाः'. **तिग्म-मूर्धन्** *a.* तेज सिरे वाला, नुकीला; sharp-edged vi.46.11 पर्णिनो दिव्यवस्तिग्ममूर्धानः 'तीक्ष्णास्याः' (बाणाः).

तिग्म-वन्त् *a.* तिग्म शब्द वाला; containing the word tigma.

तिग्म-शृङ्ग *a.* तीक्ष्ण-शृङ्ग; sharp-horned vi.16.39. तिग्म-शृङ्गो न वंसगः 'तीक्ष्णशृङ्गः'. **तिग्म-शोच्-इस्** *a.* तीक्ष्ण ज्वालावान्; hot-flamed i.79.10 तिग्मशोचिषे अग्नये 'तीक्ष्ण-ज्वालाय'. **तिग्म-हे-ति** *a.* तीक्ष्णास्त्र; having a sharp missile, having a keen thrust iv.4.4 न्यर्मित्राँ ओषतात् तिग्महेते 'तीक्ष्णा ज्वाला यस्य'.

तिग्मानीक *a.* तीक्ष्णमुख; having sharp face (edge or point) i.95.2 तिग्मानीकं · · · (त्वष्टुर्गर्भम्) 'तीक्ष्णमुखं तीक्ष्णतेजसम्'.

तिग्मायुध *a.* तीक्ष्णास्त्र; equipped with sharp weapons ii.30.3 तिग्मायुधः · · · इन्द्रः 'तीक्ष्णायुधः'.

तिग्मेषु *a.* निशितेषु; having sharp arrows x.84.1 तिग्मेषवः · · · नरः 'तीक्ष्णबाणाः'.

√तिज् पैनाना, पैना होना; to sharpen, be sharp x.138.5 तुज्यानि तेजते 'तीक्ष्णीकरोति', iii.8.2 स्वधितिस्तेजमानः 'निशितधारः', iv.23.7 तेतिक्ते तिग्मा 'अत्यर्थं तीक्ष्णीकरोति'; cp. MS. i.5.2 प्रति-तितिग्धि, for which ĀpŚS. प्रतितिण्डि is wrong, TS. i.3.5.1 अयं स्वधितिस्तेतिजानः 'अत्यन्तं तीक्ष्णः'. Forms. I. : Ā. *Pr.* तेजते; *Pt.* तेजमान. *Pf. Ipv.* तितिग्धि. *Pp.* तिक्त. *Ds.* तितिक्षते. *Int.* तेतिक्त.

तिं-त-उ [√तंस् 'shake'] *mn.* चलनी; sieve x.71.2 तितउना पुनन्तः.

ति-तिक्-षु [√तिज्] *a.* सहनशील; enduring, patient AV. xii.1.48 भद्रपापस्य निधनं तितिक्षुः.

तित्तिरि [*तिर्तिरिः, also तित्तिरिं] *m.* तीतर; partridge TS. v.5.161, VS. xxiv.20 वर्षाभ्यस्तित्तिरीन्, MS. iii.14.17 तित्तिरं.

तिं-थि [= तिथिः, उतनवां दिन.] तिथि; day.

तिमिर-घ्-अ [√हन् 'dispelling darkness, shining'] *m.* सर्पविशेष; name of a serpent TMB. xxv.15.3.

तिनी-कृ-त *a.* तनूकृत; made lean and thin MBr. ii.7.1.

तिर इव शंसति व्यवहित के समान; as if with something

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in between ABr. x.7.

तिरः करोति [कालान्तरेण करोति, दूरीकरोति] बाद में करता है, अलग करता है; performs after some time, puts away or aside.

तिरश्च् [तिरस् √अञ्च्] *av.* आरपार; across. **तिरश्च्-अ** *n.* पलंग का मध्य भाग; the cross-board of a bedstead. **तिरश्चता** *av.* तिरछे; transversely iv.18.2 तिरश्चता पार्श्वान्निर्गमाणि 'तिरश्चीनात्'. **तिरश्च-था** *av.* चुपके से, छिपे-छिपे; secretly, aside ŚBr. iii.7.3.7.

तिरश्चि-राजि *a.* तिरछी धारियों वाला; striped across (a serpent) AV. x.4 13 हर्तास्तिरश्चिराजयः, TS. v.5.10.2.

तिरश्ची (1) *m.* एक ऋषि; name of a seer, descendant of Áṅgiras viii.95.4 श्रुधी हवं तिरश्च्याः 'एतन्नामकस्यर्षेः'. (2) *a.* दक्षिणोत्तरायता, दक्षिणोत्तर स्थापित; laid south-north (Iṣṭakās, cp. अनूची). Note तिरश्ची 'तिरोऽञ्चती', पराची 'परावृता', प्रतीची 'प्रतिमुखमञ्चती'.

तिरश्च्-ईन *a.* तिरछा; transverse, lying transversely x.129.5 तिरश्चीनो विततो रश्मिरेषाम् 'तिर्यगवस्थितः'. **तिरश्चीन-पृश्नि** [तिरश्चीनानि पृश्नीनि बिन्दवो यस्य] *a.* तिरछा छपा; spotted across VS. xxiv.4, TS. v.6.12.1. **तिरश्चीन-वाय्-अ** [तिर्यक्त्वेन वयनहेतवस्तन्तुविशेषाः] *m.* आड़ा ताना; threads woven breadthwise. **तिरश्च्य** = तिरश्च.

तिर्-अस् [√तॄ] *av.* तिरछा, आड़ा, बाहर, आरपार, अन्तर्हित, अप्रकाश; across, beyond, so as to pass by, concealed ŚBr. ii.2.3.3 तिर इव हि गर्भाः तिर इव वै मिथुनेन चर्यते 'अप्रकाशम्'.

तिरिन्दिर [*तिरिम्-तिरः] *m.* एक नाम; name of a king viii.6.46 शतमहं तिरिन्दिरे 'तिरिन्दिरस्य राज्ञः'; त्रिर्-इन्दिरः ?

तिरो-अह्न्-य [रात्र्यन्तर्हितेऽहनि भवः पूर्वदिननिष्पन्नः = तिरो अह्नि TS. vii.3.13.1, also तिरोऽह्न्य] *a.* गत परसों का; belonging to the day before yesterday, more than one day old iii.58.7 तिरोअह्न्यं ··· सोमं पिबतम् 'अह्नि तिरोहिते सूयमानम्'.

तिरो-जनम् *av.* विजन; apart from men, beyond people AV. vii.38.5 यदि वासि तिरोजनम्.

तिरो-धा *f.* तिरोधान; concealment AV. vii.10.28 तिरोध एहीति 'O concealment come'.

तिरो-भूत *a.* अन्तर्हित; disappeared पुनरेम ईति देवाः एदग्निं तिरोभूतम् (ŚBr.) we are coming back, said the gods (they came back and) behold ! Agni had disappeared.

तिरो-हि-त *a.* आंखों से ओझल, अविस्पष्टार्थ पद; withdrawn from sight, concealed, obscure word ŚBr. i.1.1.2 नात्र तिरोहितमिवास्ति.

तिर्-य [= तिल्य] *a.* तिलों का; made of sesamum AV. iv.7.3.

तिर्य्-अक् *av.* आड़े, पार; across. **तिर्यग्-बिल** *a.* आड़ी तराश वाला; with orifice sideway AV. x.8.9 तिर्यग्बिलश्चमसः. **तिर्यङ् उद्ध** *a.* तिर्यग्-बद्ध (उष्णीष); twisted across (turban). **तिर्य्-अञ्च्** [तिरि = तिरस् √अञ्च्] *a.* तिरछा जाने वाला, व्यामवान्; going across, extensive in width, going or lying oblique TS. ii.5.11.4 तिर्यग्धर्माधारयति : दक्षिणां दिशमारभ्योत्तरस्यां समापनं तिर्यक्त्वम्.

तिल *n.* तिल; sesamum. **तिलौदन** *m.* तिलों की खिचड़ी; tilas cooked with rice.

तिल्-पिञ्ज *m.* फोके तिल; barren sesamum AV. xii.2.54 तिल्पिञ्जं दण्डनं नर्डम्. —**पिञ्जी** AV. ii.8.3.

तिल्व-क *m.* तिणिस; a kind of tree ŚBr.

तिल्व्-इल [तिल्विर = तिर्वि-र = √तॄ, cp. जिर्वी] *n.* उर्वर; fertile, rich v.62.7 भद्रे क्षेत्रे निमिता तिल्विले वा 'तिलुः स्निग्धा इला भूमिर्यस्य तत् क्षेत्रं तिल्विलं देवयजनम्'. **तिल्विलायते** [*Denom.*] becomes fertile or rich vii.78.5 तिल्विलायध्वमुषसः 'जगत् स्निग्धभूमिकं कुरुत'.

तिष्-य [√तिष् = त्विष् 'shine'] *m.* पुष्य; name of a heavenly archer (like कृशानु) and of the sixth nákṣatra of the old or eighth of the new order v.54.13 न यो युच्छति तिष्यो यथा दिवः 'तिष्यः आदित्यः', TS. iv.4.101 तिष्यो नक्षत्रम्.

तिस्र-धन्व [—म्] *n.* तीन तीरों वाला धनुष; a bow with three arrows TS. i.8.19.1, v.7.7.2 तिस्रधन्वमयाचितं ब्राह्मणाय.

तीक्ष्-ण [तीक्-क्ष्ण √तिज्] *a.* तेज; sharp x.87.9 तीक्ष्णेन चक्षुषा. **तीक्ष्ण-तर** *a.* अधिक पैना; sharper. **तीक्ष्ण-दंष्ट्र** *a.* तेज दांतों वाला; having sharp teeth or tusks TAr. x.1.6. **तीक्ष्ण-शृङ्ग** *a.* तिग्मशृङ्ग; sharp-horned x.155.2 ब्रह्मणस्पते तीक्ष्णशृङ्ग 'तीक्ष्णतेजस्क'.

तीक्ष्ण्-इष्ठ *a.* अति तीक्ष्ण; very sharp. **तीक्ष्ण्-ईयांस्** *a.* तीक्ष्णतर; sharper.

तीक्ष्णेषु *a.* निशितेषु; sharp-arrowed TS. iv.5.7.1.

तीर्-अ [√तॄ] *n.* तट, प्रान्त, मुंह; shore, bank, brim of a vessel (उखायाः) ŚBr. vi.

तीर्-ण [√तॄ] *a.* पार गया; gone to the other side तीर्णो हि तदा सर्वान् BṛUp. Cp. अतीर्ण.

तीर्-र्थ *n.* स्नानघाट, घाट, अवतरण-प्रदेश, मार्ग, शास्त्रविहित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्याय (स वै गौतम तीर्थेन इच्छासै 'शास्त्रविहितेन न्यायेन' BrUp) x.40.13 कृतं तीर्थं सुप्रपाणम्, TS. ii.6.8.2 तीर्थं एवं प्राशनन्ति 'दुःखोत्तरणावसरे', TS. ii.6.8.4 तीर्थेनैव परं हरति 'नद्यवतरणसदृशेनैव मार्गेण'; वेदि एवं उत्कर का मध्यवर्ती स्थान; the place between vedi and the utkara Sat. vii.8 तीर्थेन प्रपाद्य; दानयोग्य व्यक्ति; one deserving gifts Sat. xxvii.5 द्रव्येण तीर्थं प्रतिपन्नेन. **तीर्थ्-य** *a.* तीर्थसंबन्धी; relating to ford VS. xvi.42 नमस्तीर्थ्याय च कूल्याय च, TS. iv.5.8.2.

तीव्-र [√तीव् 'be fat'] (1) *a.* तेज, बली, प्रोल्वण; sharp, strong, violent ii.41.14 तीव्रो वो मधुमाँ अयम् 'तीव्रमदः'. (2) *m.* अतिकद्वम्ल सोम; very pungent Soma Sat. ix.2. **तीव्र-सु-त** *a.* खमीर उठे में से चुआया सोम; pressed from the fermenting mass, pressing pungent Soma vi.43.2 यस्य तीव्रसुतं मदम् 'तीव्रसुतः प्रातःसवनिकः। तीक्ष्णं सुतमभिषवो यस्य'. **तीव्र-सोम** *m.* सप्तदशस्तोमक उक्थसंस्थ एकाह; name of an Ekāha TMB. xviii.5.1. **तीव्रान्त** [अवश्यंभावि फलं यस्य स सोमः] *a.* अवश्यमेव फलप्रद; inevitably bringing fruit.

√**तु** बलवान् होना, फलना-फूलना; to be strong, thrive i.94.2 स तूताव 'वर्धते'; बली बनाना; to make strong vi.26.4 गृणन्तमिन्द्र तूतोः 'अवर्धयः', iv.40.4 क्रतुं दधिक्रा अनु संतवीत्वत् (*Intens. Pt.*) 'प्रवृद्धबलवान् सन्'. Forms II. P. : *Pr.* तवीति. *Pf.* तूताव. *Ppf.* तूतोस्, तूतोत्. *Int.* तवीत्वत्.

तु [*Particle*] तब; pray, then.

तुग्-र [√तुज्] *m.* भृगुपिता; name of Bhṛgu's father; इन्द्र का एक शत्रु; name of an enemy of Indra त्वं तुग्रम् अहन् 'असुरम्'. **तुग्र्-य** *m.* तुग्र का अपत्य भुज्यु; patronymic of Bhujyú viii.32.20 यस्तुग्र्ये सचा 'तुग्र्ये उदके संसृष्टः'. **तुग्र्-या** *f.* तुग्रवंशी; descended from Tugra i.33.15 तुग्र्यासु 'जलेषु गतं मम्म्'. **तुग्र्या-वृध्** *a.* तुग्रवंशियों का सहारा; favouring the Tugryas viii.45.29 उक्थेषु तुग्र्यावृधम् 'उदकस्य वर्धयितारम्'.

तुग्-वन् *n.* उथला जल; ford viii.19.37 सुवास्त्वा अधि तुग्वनि.

तुच् [= तोक] *f.* संतति; offspring vi.48.9 विदा गाधं तुचे तु नः.

तुच् see अ-तुच्, त्वच्.

तुच्छ्-य *a.* तुच्छ, छूंछा, रिक्त; empty, blank v.42.10 तुच्छ्यान् कामान् 'नश्वरान्', x.129.3 तुच्छ्येनाभ्वपिहितम् 'तुच्छकल्पनेन'.

√**तुज्** [cp. Hindi √तुज 'waste away'] हिंसा करना; to hurt, strike iv.23.7 तेतिक्ते तिग्मा तुजसे अनीका 'वधाय'; दनदनाते चलना; to move with violence, tremble i.84.17 क ईषते तुज्यते को बिभाय who flees and moves with violence, who is afraid ?, i.61.14 द्यावा च भूमा तुजेते 'कम्पेते, TS. iii.1.11.8 पेरुं तुज्ञानो 'आभाषमाणा'; प्रयत्न करना, जूझना; to be eager in an effort iii.39.8 तुजतो मर्त्यस्य 'भूरिप्रदस्य'; बढ़ाना; to promote i.143.6 तुतुज्यात सातये धियः 'त्वरयतु'; सोमसवन करना; to press out Soma ix.15.3 यदी तुञ्जन्ति भूर्णयः 'प्रयच्छन्ति'; देना; to pour out (wealth) viii.4.15 तुजे राये 'शत्रून् हिंसितुम्'. **तुज्-अये** [*Dat. Inf.*] उत्पन्न करने को; to procreate, breed TBr. iii.5.12 प्रार्वन्तु नस्तुजये वाजसातये. Forms. VII. : *Pr.* तुञ्जन्ति; तुञ्जते *(3 pl.)*. *Pt.* तुञ्जान. VI. : *Pr.* तुजेते; *Pt.* तुजन्त्. *Pf. Op.* तुतुज्यात्; *Pt.* तूतुजान and तूतुजान; *Ps.* तुज्यते. *Inf.* तुजसे, तुजये, –तुजे. *Cs. Pt.* तुजयन्त्.

तुज्-इ *m.* इन्द्र का एक भक्त; a protege of Indra vi.26.4 तुजिं गृणन्तम् 'एतदाख्यं राजानम्'.

तुज्-य *a.* प्रेरयितव्य, हिंस्य; to be pressed, impelled or injured iii.62.1 युवावते न तुज्या अभूवन् 'हिंस्याः'.

तुञ्ज्-अ [cp. तुङ्ग] *m.* आक्रमण; assault, pressing on i.7.7 तुञ्जेतुञ्जे य उत्तरे 'तस्मिंस्तस्मिन् फलदातरि देवान्तरे। तुञ्जतिर्दानकर्मा। दातरिदातरि'.

तुण्ड्-इक *a.* थोबड़े वाला; snouted AV. viii.6.5 स्तम्बज उत तुण्डिकः. **तुण्ड्-एल** *m.* रक्षोविशेष; name of a goblin AV. viii.6.17 तुण्डेलमुत शालुडम्.

तु-तुर्-वणि [√तॄ] *a.* प्रयत्न-पर; striving after i.168.1 समना तुतुर्वणिः 'तूर्णवनिः तरमाणा संभजमाना'.

तु-र्थ [√तु 'be strong'] *m.* सर्वशक्तिमान् देव; the all-powerful god.

√**तुद्** धकेलना, पेलना, पदाना; to thrust, beat viii.1.11 यत तुदत् सूर एतशम् 'अव्यथयत्'. Forms. VI. : *Pr.* तुदति; *Ipv.* तुद; तुदन्तु; *Pt.* तुदन्त्. *Ipf.* तुदत. *Pf.* तुतोद. *Pp.* तुन्न.

तुद्-अ *a.* प्रेरक; impelling. **तुन** for तन.

तुन्-न *a.* पेला; struck, goaded, hurt. **तुन्यु** *m.* तुन; a kind of tree Kauś. viii.15.

तुम्-इञ्ज *m.* एक नाम; name of a man MS. i.7.2.

तुम्-र [√तुम्, √तु] *a.* पीवर; stout iii.50.1 तुम्रो वृषभः; cp. तोमर 'iron-club'.

√**तुर्** [= तॄ] जोर से आगे बढ़ना, दबा लेना; to press forward with force or quickly, overcome viii.99.5 त्वं तूर्य तरुष्यतः 'शत्रूणां बाधक'. Cp. रथ्रतुर्, विश्वतुर् etc. Forms. VI. : *Pr.* तुरति, –ते. IV. P. : *Ipv.* तूर्य. II. P. : *Op.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

तुर्यामि. *Pf. Op.* तुतुर्यात्; तुतुर्यामि. *Pp.* –तूर्ति. *Gd.* –तूर्य. *Inf.* तुर्वणे. *Cs.* तुर्यते. *Ds.* तूतूर्षति.

तुर् *a.* आगे बढ़ने वाला, आजिधावी; pressing forward, racing, running a race i.112.4 तूर्षु तरणिर्विभूषति 'तरीतृषु धावत्सु'; वर्धक; promoting v.82.1 तुरं भगस्य धीमहि 'शत्रूणां हिंसकम्'.

तु-र् [√तु 'grow strong'] *a.* बली; strong i.121.3 तुरो विशामंगिरसाम् 'धनस्य प्रेरयिता'; धनी; rich vii.41.2 आर्ध्नश्चिद् यं मन्यमानस्तुरश्चित् 'प्राप्तधनः'; दण्ड; a club MBr. ii.6.19 तुर गोपाय मा.

तुर्-अ [√त्वर्] *a.* त्वरमाण, प्रोल्वण; rash x.96.7 हरी तुरा 'त्वरमाणौ'; striving, eager viii.3.13 तुरो गृणीत मर्त्यः 'प्रेरयिता'; pushing on, pressing forward.

तुर्-अ [√तुर्] *a.* क्षत; wounded viii.79.2 भिषक्ति विश्वं यत् तुरम् 'रुग्णम्'; cp. आतुर.

तुर्-गातु *a.* त्वरितगामी; going quickly i.164.30 अनच्छये तुरगातु जीवम् 'तूर्णगमनम्'.

तुर्-अण *a.* त्वरावान्; quick, speeding i.121.5 तुरणि भुरण्यू 'क्षिप्रकारिणे'.

तुरण्-यति [*Denom.*] भागता है; goes rapidly iv.40.4 वाजी तुरण्यति 'त्वरयति गन्तुम्'. **तुरण्य-र्सद्** *a.* त्वरितों में रहने वाला; dwelling among rapid, i.e. one among the top racers iv.40.2 गविषः ··· तुरण्यसत 'त्वरया सीदतीति'. **तुरण्-यु** *a.* त्वरित; quick, swift i.134.5 शुचयस्तुरण्यवः 'त्वरणयुक्ताः'.

तुर्यन्त् *a.* त्वरा दिखाता हुआ; showing speed or haste viii.99.6 शुष्मं तुर्यन्तम् 'हिंसन्तं शत्रून्' = VS. xxxiii.67.

तुर-र्या [= एव-र्या] *a.* शीघ्रगामी; going quickly iv.23.10 ऋतस्य शुष्मस्तुरर्याः.

तुरस्-पेय *n.* त्वरावान् का पान; drinking of that who presses forward (Soma) x.96.8 तुरस्पेये यो हरिपा अवर्धत 'तूर्ण पातव्ये'.

तुरायण *n.* देवमुनि तुर द्वारा प्रवर्तित सत्र; name of the Sattra instituted by the sage Tura TMB. xxv.14.

तुरा-साह् *a.* बलियों का विजेता; overcoming the mighty iii.48.4 तुरासाळिन्द्रः.

तुर्-ई *f.* जिति, जय; victory x.106.4 नृषतीव तुर्यै 'कर्मार्थं त्वरमाणायै संभ्रमवत्यै जनतायै'.

तुरीप [तुरिं √आप् 'victoriously entering'] *n.* प्रोल्वण अथवा त्वरित प्रवेशवान् वीर्य; semen entering effectively, forceful seminal fluid i.140.10 तन्नस्तुरीपमदभुतम् 'तूर्णं व्यापि', VS. xxi.20 त्वष्टा तुरीपो अद्भुतः 'तूर्णं व्याप्नोति'.

तुर्-ईय *a.* चतुर्थ; fourth viii.5.2.7; चौथाई; one-fourth तुरीयमेवं तर्हि वाङ् निरुक्तं वदिष्यति (ŚBr.) then Vāc will speak distinctly to the extent of one-fourth.

तुर्फरी [√तृफ्] *a.* हिंसक; injuring, striking x.106.6 तुर्फरी पर्फरीका 'शत्रणां हन्तारौ' = **तुर्फरीतु** x.106.6 जर्भरी तुर्फरीतू.

तुर्य-वाह् [तुर्यत्वेन वोढुं शक्तः] *m.* चार साल का बैल; four year old ox VS. xviii.26 तुर्यवाट् च मे तुर्यौही च मे 'तुर्यं वर्षं वहतीति तुर्यवाट् सार्धत्रिवर्षो वृषः' Mah. = TS. iv.3.3.2, 7.10.2.

तुर्-र्या *f.* त्वरा, उत्कृष्ट शक्ति; speed TS. ii.2.12.4 दधते पृत्सु तुर्याम् 'तूर्णं यातारं करोति'.

तुर्व *m.* एक नाम; name of a hero, generally called तुर्वश x.62.10 यदुस्तुर्वश्च मामहे 'एतन्नामा राजर्षिः'.

तुर्-वणि *a.* विजेता, हन्ता, तूर्णसंभक्ता, व्यावृत्त; overcoming, victorious, excellent VS. xx.48; i.56.3 त्वं तुर्वणिर्महान् 'हिंसिता'.

तुर्-वन् *n.* हिंसन, विजय, प्राप्ति; act of overcoming, attaining, acquiring viii.9.13 यत् पृत्सु तुर्वणे सहः 'शत्रूणां हिंसने', viii.12.19 अधा यज्ञाय तुर्वणे 'तूर्णं संभजनाय'.

तुर्व-श *m.* एक नाम; name of a man vii.18.6 तुर्वशार्यदू. Cp. x.62.10 तुर्वश्च = तुर्वशश्च.

तुर्व-ई-ति *m.* name of a person i.36.18.

तुला [√तुल्, Mod. Pers. tarāzū] *f.* तराजू; balance.

तुल्य-जामी *a.* तुल्य-जाति; of the same race or caste : जामीशब्दो जातिवाची.

तुव-ई [√तु] *a.* अधिक, प्रचुर बली; much, many, abundant, mighty. —**कूर्-मि** [or —**र्मिन्**] *a.* बल से करने वाला, बल के काम करने वाला; working powerfully, doing great works or exploits iii.30.3 तुविकूर्मिर्ऋधावान् (इन्द्रः) 'नानाविधकर्मणां कर्ता'. **तुवि-क्रतु** *a.* अति बली; having great power viii.68.2 तुविशुष्म तुविक्रतो 'बहुकर्मन् अथवा बहुप्रज्ञ'. **तुवि-क्ष्-अ** [√क्षि 'destroy'] *a.* बलेन हन्ता, बहूनां हन्ता; greatly destroying, destroying many viii.77.11 तुविक्षे ते धनुः 'बहुविक्षेपं महाविक्षेपं वा'. **तुवि-क्षत्र** *a.* प्रचण्ड शासक; ruling powerfully VS. xxi.5 तुविक्षत्रामिर्जरन्तीम्, TS. i.5.11.5 'बहुराजपालिताम्'. **तुवि-ग्र्-अ** [√गृ, or तुवि-विग्र ?] *a.* ध्वानवान्; roaring aloud; अतिवेगवान्; of mighty swiftness i.140.9 तु-विग्रेभिः सत्वभिः 'प्रभूतं शब्दयद्भिः प्रभूतगमनैर्वा'. —**ग्राभ्-अ** *a.* मजबूत पकड़ वाला; seizing powerfully vi.22.5 तुविग्राभं तुविकूर्मिम् (इन्द्रम्) 'बहूनां ग्रहीतारम्'. **तुवि-ग्र्-ई** = तुविग्र ii.21.2 तुविग्रये 'पूर्णग्रीवाय। यद्वा बहुभिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तोतव्याय'. **तुवि-ग्रीव** *a.* भारी गरदन वाला; powerful-necked v.2.12 तुविग्रीवो वृषभः 'बहुज्वालः प्रभूतग्रीवो वा' (अग्निः). **तुवि-जात** *a.* धूमधाम से उत्पन्न; mightily born i.131.7 तुविजात (इन्द्र) 'बहुभावमापन्न'.

तुवि-देष्ण *a.* प्रभूत दाता; giving much, mightily giving viii.81.2 तुविदेष्णं तुवीमघम् 'बहुप्रदेयम्'. **तुवि-द्युम्न** *a.* अति तेजस्वी; very glorious, greatly shining i.9.6 तुविद्युम्न (इन्द्र) 'बहु धनं यस्य'. **तुवि-नृम्ण** *a.* अति नर; very valiant, very manly viii.70.10 तुविनृम्ण (इन्द्र) 'प्रभूतधन'; on iv.22.6 'अधिकबल'.

तुवि-प्रति *a.* बली प्रतिरोद्धा; encountering mightily, encountering many i.30.9 हुवे तुविप्रतिं नरम् 'बहूनां प्रतिगन्तारम्'; cp. प्रतिप्रति 'encountering each'. **तुवि-बाध्-अ** *a.* बहुतों का संहारक; killing or oppressing many i.32.6 महावीरं तुविबाधमृजीषम् 'बहूनां बाधकम्'.

तुवि-ब्रह्मन् *a.* परम भक्त; praying much, very devout v.25.5 तुविब्रह्माणमुत्तमम् 'बहुस्तोत्रम्'.

तुवि-मघ = तुविदेष्ण v.33.6 स्तुषे तुविमघस्य दानम् 'प्रभूत-धनस्य'. **तुवि-मन्यु** *a.* प्रवृद्धमन्यु; mightily angry, very zealous vii.58.2 भीमासस्तुविमन्यवः 'प्रवृद्धमतयः' (मरुतः). **तुवि-मात्र-अ** *a.* बहुप्रमाण; massive viii.81.2 विद्मा हि त्वा तुविमात्रम् 'बहुप्रमाणम्'. **तुवि-म्रक्ष्-अ** *a.* अतिशोधक, अतिसंहर्ता; cleaning powerfully, injuring greatly vi.18.2 तुविम्रक्षो नदनुमान् 'बहूनां वर्षणेन स्नेहनकर्ता। मृक्षतिः संस्नेहनकर्मा', TS. iii.3.11.2 तुविम्रक्षासो दिव्याः 'बहूनां शोधकाः'.

तुवि-राधस् *a.* प्रचुर देयों वाला; granting many gifts, giving greatly vii.23.5 तुविराधसं जरित्रे 'बहुधनम्'.

तुवि-वाज *a.* प्रभूत-बल; mighty i.130.13 रेवतीः··· तुविवाजाः 'प्रभूतबला गावः', vi.18.11 पथिभिः तुविवाजेभिः 'बहुबलैः', TS. ii.4.14.4 तुविवाजाः (आपः) 'बहुन्नयुक्ताः'.

तुवि-शग्-म *a.* प्रचुर-शक्ति, बहुकर्मा; capable of much, able to do much vi.44.2 यः शग्मस्तुविशग्म 'बहुसुख'. **तुवि-शुष्-म** *a.* अतिरभस, प्रभूत शक्तिमान्; high-spirited, highly vehement viii.68.2 तुविशुष्म तुविक्रतो 'प्रभूतबल'. **तुवि-श्रव्-अस्-तम** *a.* अतिपृथुकीर्ति; of great fame, highly renowned iii.11.6 अग्निस्तुविश्रवस्तमः 'अतिशयेन बहुविधान्नोपेतः'.

तुविष्-टम *a.* बलिष्ठ; strongest, most powerful i.186.6 चर्षणिप्रास्तुविष्टमः 'बहुतमो महत्तमः'. **तुविष्-मर्णस्** *a.* प्रौढमनस्क; of noble or high mind TS. iii.3.11.2. **तुविष्-मन्** *a.* बली; mighty, powerful vii.20.4 तविषीभिस्तुविष्मः 'बहुधन'. **तुवि-ष्वण्-अस्** *a.* तार-स्वर; loud-sounding v.8.3 तुविष्वणसं घृतश्रियम् 'प्रभूतध्वनिम्'. **तुवि-ष्वण्-इ** *a.* महा-ध्वनि; roaring mightily i.58.4 तुविष्वणिः (अग्निः) 'महास्वनः' = महिष्वणीनाम् viii.46.18. **तुवि-ष्वन्** *a.* जोर से ध्वनि करने वाला; roaring aloud i.166.1 मरुतस्तुविष्वणः 'प्रभूतध्वनियुक्ताः'.

तुव्-इस् *n.* शक्ति; might; in तुविष्मन्त् etc. Cp. तविस्.

तुवी-मघ *a.* अति धनी; very rich i.29.1-7 तुवीमघ *(Voc.)* 'बहुधन'.

तुवी-रव्-अ *a.* = तुविष्वणि; roaring or making a terrible noise, of mighty roar x.99.6 सं ईं दासं तुवीरवम् 'बहुशब्दम्'. **तुवी-रव्-अस्** *a.* = तुविष्वणस् x.64.4 कर्विस्तुवीरवान् 'बहुस्तोतृयुक्तः। यद्वा बाहुल्ययुक्तैर्देवैः सहितः'.

तुव्य्-ओजस् *a.* अति बली; very strong or powerful iv.22.8 रश्मिं तुव्योजसम् 'बहुबलम्'.

√**तुश्** टपकना, चूना, बहना, गिरने या बहने देना, खुले हाथों व्यय करना, देना; to trickle, drop or flow, let drop or flow (रयिम्), spend or give freely; with नि नीचे की ओर बहना; to flow downward ix.45.2 त्वमिन्द्राय तोशसे 'पीयसे', iv.38.1 यो पूर्भ्यस्त्रसदस्युर्नितोशे 'दत्तवान्', ix.63.23 पवमान नि तोशसे रयिम् 'शत्रूणां धनं नितरां पीडयसि'.

√**तुश्** [=√तुष्] संतुष्ट होना, संतुष्ट करना, छका देना, छक्के छुड़ा देना; to be satisfied, to satisfy, appease, bear hard on viii.15.11 एको वृत्राणि तोशसे 'हिनस्सि', viii.50.5 आ नः सोमे स्वध्वरे··· तोशते 'हिनस्ति', AV. iii.17.5 शुनासीरा हविषा तोशमाना; चुप हो जाना, संतुष्ट हो जाना; to become quiet, be satisfied with.

√**तुष्** = √तुश् x.27.16 गर्भं मातेव ··· अवेनन्तं तुषयन्ती बिभर्ति 'तुष्यन्ती'.

तुष्-अ *m.* तूड़ी, भूसा; chaff of grain or corn or rice AV. xii.3.19 तुषं पलावानप तदं विनक्तु. **तुष-पक्-व** *a.* तूड़ी की आग में सूखा; dried by chaff fire MS. iii.2.4. **तुषोपवाप** *m.* cp. उपवाप 'तुषाणां प्रतिपत्तिः'.

तुष्-टि *f.* तोष; satisfaction.

तु-ष्टु-वांस् [√स्तु, *Pf. Pt.*] स्तुति करके; having praised.

तु-स्तूर्षमाण [√स्तृ, *Desid.*] *a.* मारना चाहता हुआ; wishing to lay low न हैनं सपत्नस्तुस्तूर्षमाणश्चर्न स्तृणुते (ŚBr.) no enemy fells him even though desiring to fell him.

तूण-व *m.* मुरली, वेणु; flute, bamboo TS. vi.1.4 यो तूणवे यो वीणायाम्. **तूणव-धम्-अ** *a.* मुरलीवादक; flute-player = **तूणवध्म** TBr. iii.4.13.

तूर्-तुज्-आन [√तुज्] *a.* त्वरमाण, लालायित; hastening,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

eager VS. xx.89 इन्द्रा याहि तूतुजानः 'त्वरमाणः'. **तू-तुज्-इ** *a.* त्वरित; quick, speeding iv.32.2 भृमिंश्चिद् तूतुजिः 'अभीष्टफलप्रदाता'. **तू-तुज्-ई** *a.* उत्तेजक; stimulator. **तू-तु-र्म** [√तु, see तुम्र] *a.* शक्तिशाली; powerful x.50.5 एतां सर्वना तूतुर्मा कृषे 'तूर्णानि'.

तूपर्र [= स्तूपर्र? 'hairy'] *a.* पतितश्रृङ्ग या श्रृङ्गहीन; hornless (a goat or cow) VS. xxiv.1.

तू-य [√तु] (1) *a.* शक्तिमान्; strong x.28.3 तूयान् सुन्वन्ति सोमान् 'अविलम्बितान्'. (2) *n.* —**म्** *n.* जल; water = तोय. —**म्** *av.* क्षिप्र; quickly iii.43.3 आ याहि तूयम् 'क्षिप्रम्', viii.4.3 तूयमा गहि कण्वेषु सु सचा पिब come quickly beside the Kaṇvas and drink thy fill.

तूर् (1) *f.* त्वरा; haste. (2) *a.* त्वरावान् आजिधावी; one who runs a race i.112.4 तूर्षु 'among those who compete in a race'. **तूर्-घ्न्-अ** *a.* आजिधावी को मारने वाला; killing the racer, name of the northern part of Kurukṣetra. **तूर्-णम्** *av.* सत्वर; quickly.

तूर्-णाश्-अ *m.* पानी का प्रवाह; rush of water viii.32.4 तूर्णाशं न गिरेरधि 'तूर्णाशमुदकं भवति'.

तूर्-णि *a.* त्वरावान्, (तरतीति) तैराक; TS. ii.5.9.3 तूर्णिरित्याह सर्वं ह्येष तरति; hasty, quick, speeding iii.11.5 तूर्णी रथः 'त्वरायुक्तः', one who crosses or completes a rite.

तूर्णि-तम *a.* अतित्वरितः; very quick TS. i.2.14.1.

तूर्ण्य्-अर्थ *a.* लक्ष्य के पीछे भागने वाला; quickly pressing to the goal ii.52.5 स्तोर्ता जरिता तूर्ण्यर्थः 'त्वरितगमनः'.

तूर्-त *a.* तेज, त्वरावान्; quick.

तूर्-य [√तॄ] *a.* विजयी; overcoming; in शत्रु-तूर्य, वृत्र-तूर्य etc.

तूर्यन्ती *f.* कलिहारी; Gloriosa Superba Linn ĀpŚS. xiv.13.

√तूर्व् [√तुर्व्, √तॄ] विजय के साथ आगे बढ़ना; to advance victoriously vi.20.3 तूर्वन्नोजीयान् (इन्द्रः) 'हिंसन्'; दबा लेना, जीत लेना; to overcome TS. iv.6.1.62 तूर्वन्न यामन् 'हिंसन्', viii.99.6 वृत्रं यदिन्द्र तूर्वसि 'हंसि'; बचाना; to rescue from, save vi.50.10 तूर्वतं नरा दुरितादभीके 'दुःखात् तारयतम्'.

